लिप्ताः कर्कटपादेन केवलेनाथ वा द्विजाः ॥
त्रिसप्ताहं वारिपिष्टा ज्योतिष्मत्याः फलस्य हि ।
मत्स्याभया च शुक्रस्य लेपादङ्गकलङ्कनुत् ॥
लोध्रकुङ्कुममञ्जिष्ठा लोहकालीयकानि च ।
यवतण्डुलमेतैश्च यष्टीमधुसमन्वितैः ॥
वारिपिष्टैर्वक्त्रलेपः स्त्रीणां शोभनवक्त्रकृत् ।
द्विभागच्छागदुग्धेन तैलप्रस्थन्तु साधितम् ॥
रक्तचन्दनमञ्जिष्ठालाक्षाणां कर्षकेण वा ।
यष्टीमधुकुङ्कुमाभ्यां सप्ताहान्मुखकान्तिकृत् ॥
शुण्ठी च पिप्पलीचूर्णं गुडूची कण्टकारिका ।
एभिश्च क्वथितं वारि पीतवह्निं करोति वै ॥
वातशूलक्षयश्चैव सुरघ्नमखेश्वर ! ।
करञ्जपर्पटोशीरं वृहती कटुरोहिणी ॥
गोक्षुरं क्वथितं त्वेभिर्वारि पीतं श्रमापहम् ।
दाहपित्तज्वरं शोषं मूर्च्छाञ्चैव क्षयं नयेत् ॥
मध्वाज्यपिप्पलीचूर्णं क्वथितं क्षीरसंयुतम् ।
पीतं हृद्रोगकासघ्नं विषमज्वरनुद्भवेत् ॥
क्वाथौषधीनां सर्व्वासां कर्षार्द्धं ग्राह्यमेव च ।
वयोऽनुरूपतो ज्ञेयो विशेषो वृषभध्वज ! ॥
दुग्धं पीतन्तु संयुक्तं गोपुरीषरसेन च ।
विषमज्वरनुत् स्याच्च काकजंघारसस्तथा ॥
सशुण्ठीक्वथितं क्षीरमजाया ज्वरनुद्भवेत् ।
यष्टीमधु मुस्तकञ्च सैन्धवं वृहतीफलम् ॥
एतैर्नस्यप्रदानाच्च निद्रा स्यात् पुरुषस्य च ।
मरीचमधुशुण्ठीनां नस्यान्निद्रा भवेच्छिव ! ॥
मूलन्तु काकजङ्घाया निद्राकृत् स्यात् शिरःस्थितम् ।
सिद्धं तैलं काञ्जिकेन तथा सर्व्वरसेन च ॥
शीतोदकसमायुक्तं लेपात् सन्तापनाशनम् ।
शोणितज्वरदाहेभ्यो जातसन्तापनुत्तथा ॥
शूकशैवालमश्मा च शुण्ठीपाषाणभेदकम् ।
शोभाञ्जनं गोक्षुरं वा वरुणच्छदमेव च ॥
शोभाञ्जनस्य मूलञ्च एतैः क्वथितवारि च ।
दत्त्वा हिङ्गु यवक्षारं पीतं वातविनाशनम् ॥
पिप्पली पिप्पलीमूलं तथा भल्लातकं शिव ! ।
वार्य्येतैः क्वथितं पीतं वरशूलापसारकृत् ॥
अश्वगन्धामूलकाभ्यां सिद्धा वल्मीकमृत्तिका ।
एतया मर्द्दनात् रुद्र ! उरुस्तम्भः प्रशाम्यति ॥
वृहतीकस्य वै मूलं संपिष्टमुदकेन च ।
पीतं झिञ्झिनिवातघ्नं विपाटनकृदेव च ॥
पीतं तक्रेण मूलं च आर्द्रस्य तगरस्य च ।
हरेत् झिञ्झिनिवातं वै हस्तमिन्द्राशनिर्यथा ॥
अस्थिसंहारमेकेन भक्तेन सह खादितम् ।
पीतं मांसरसेनापि वातनुच्चास्थिभङ्गहृत् ॥
घृतलिप्तं शङ्खकञ्च छागक्षीरेण संयुतम् ।
तल्लेपात् पादयोर्नश्येत् सन्तापो नात्र संशयः ॥
मध्वाज्यं सैन्धवं सिक्थं गुड़गैरिकगुग्गुलैः ।
ससर्ज्जरसः स्फुटितः कोमलोऽङ्घ्रिश्च लेपनात् ॥
कटुतैलेन लिप्तो व विधमाणौ प्रतापितः ।
मृत्तिकाखादितः पादः समः स्याद्वृषभध्वज ! ॥
सर्ज्जरसः सिक्थकञ्च जीरकञ्च हरीतकी ।
तत्साधितघृताभ्यक्तो ह्यग्निदग्धव्यथापनुत् ॥
तिलतैलञ्चाग्निदग्धयवभस्मसमन्वितम् ।

अग्निदग्धं व्रणं नश्येद्रूक्षः क्षतलेपतः ॥
नवनीतं माहिषञ्च दुग्धपिष्टतिलानि च ।
भल्लातकव्रणं नश्येत् हृच्छल्यं तस्य लेपतः ॥
शरपुङ्खा लज्जालुका पाठा चैषान्तु मूलकम् ।
जलपिष्टं तस्य लेपात् शस्त्राघातः प्रशाम्यति ॥
मूलञ्च काकजङ्घायास्त्रिरात्रेणैव शोषतः ।
पाकपूतिवेदनाञ्च हन्ति वै रोहिते व्रणे ॥
सजलं तिलतैलञ्च अपामार्गस्य मूलकम् ।
तत्सेकदानान्नश्येत प्रहारोद्भववेदना ॥
अभया सैन्धवं शुण्ठिरेतत् पिष्टोदकेन तु ।
भक्षयित्वा ह्यजीर्णस्य नाशो भवति शङ्कर ! ॥
कटिबद्धं निम्बमूलमक्षिशूलहरं भवेत् ।
शम्यामूलं सताम्बूलं पीतमिन्द्रियकम्पहृत् ॥
अन्नसिद्धं हरिद्रा च श्वेतसर्षपमूलकम् ।
वीजानि मङ्गलदिने एषामुद्वर्त्तनं समम् ॥
सप्तरात्रप्रयोगेण शुभदेहकरं भवेत् ।
श्वेतापराजितापत्रं निम्बपत्ररसेन तु ॥
नस्यदानात् डाकिनीनां मातृणां ब्रह्मरक्षसाम् ।
मोक्षः स्यान्मधुसारेण नस्याच्च वृषभध्वज ! ॥
मूलं श्वेतजयन्त्याश्च पुष्यर्क्षे तु समाहृतम् ।
श्वेतापराजितार्कस्य तथा चित्रस्य मूलकम् ॥
कृत्वा तु वटिकां नारी तिलकेन वशी भवेत् ॥
पिप्पली लोहचूर्णन्तु शुण्ठ्यामलकानि च ।
समानि रुद्र ! जानीयात् सैन्धवं मधु शर्करा ॥
उदुम्बरप्रमाणेन सप्ताहं भक्षणात् समम् ।
पुमांश्च बलवान् स्याच्च जीवेद्वर्षशतद्वयम् ॥
ॐ ठ ठ ठ इति ।
सर्व्ववश्यप्रयोगेषु प्रयुक्तः सर्व्वकामकृत् ॥
संगृह्य हस्तात् काकस्य निलयं प्रदहेच्च तत् ।
चिताग्नौ भस्म तच्चोर्दत्तं शिरसि शङ्कर ! ॥
तमुच्चाटयते रुद्र ! शृणु तं योगमुत्तमम् ।
निक्षिपेच्च पुरीषं वै वनमूषिकचर्म्मणि ॥
कठ्यां तन्तु निबद्धं वै कुर्य्यान्मलनिरोधनम् ।
कृष्णकाकस्य रक्तेन यस्य नाम प्रलिख्यते ॥
चूतदलेऽमेध्यमध्ये ततो निक्षिप्यते हर ! ।
स खाद्यते काकवृन्दैर्नारी पुरुष एव वा ॥
शर्करा मध्वजाक्षीरं तिलगोक्षुरकं समम् ।
पाण्डुत्वं नाशयेद्रुद्र ! आस्वादितमिदं हर ! ॥
उलूककृष्णकाकस्य पिच्छस्याथ समिच्छतम् ।
रुधिरेण समायुक्तं ययोर्नाम्ना च हूयते ॥
तयोर्द्वयोर्महावैरं भवेन्नास्त्यत्र संशयः ।
भावितं ऋक्षदुग्धेन रोहितस्य शशस्य च ॥
मांसं तत्साधितं तैलं तदभ्यङ्गश्च रोगनुत् ।
चन्दनोदकनस्यात्तु रोमोत्थानं भवेत् पुनः ॥
हस्ते लाङ्गलिकाकन्दं गृहीतं तेन लेपितम् ।
शरीरं येन स पुमान् बुद्धेर्दर्पं व्यपोहति ॥
पराक्रमेण युक्तस्य शूरस्य पुरुषस्य हि ।
वर्त्तिर्य्यस्य पुरीषेण कृतगर्भा तु भाविता ॥
मयूररुधिरेणैव जीवमाहरते शिव ! ।
ज्वरितानां भुजङ्गानां विलस्थानामपीश्वर ! ॥
देहश्चिताग्नौ दग्धस्तु सर्पस्याजगरस्य हि ।
तद्धूम सम्मुखे क्षिप्तं शत्रूणां भङ्गकृद्भवेत् ॥

मन्त्रेणानेन तत् क्षिप्तं महाभङ्गकरं रिपोः ।
ॐ ठ ठ ठ ठाही ठाही ठाही स्वाहा ।
ॐ उदरः पाही पाही स्वाहा ॥
सुदर्शनाया मूलन्तु पुष्यर्क्षे तु समाहृतम् ।
निःक्षिप्तं गृहमध्ये तु भुजङ्गा वर्जयन्ति तम् ॥
मार्ज्जारपलं विष्ठा हरितालञ्च भावितम् ।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत् ॥
युक्तो हि मन्दिरे रुद्र ! नात्र कार्य्या विचारणा ।
त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ॥
लाक्षा सर्ज्जरसश्चैव विड़ङ्गश्चैव गुग्गुलुः ।
एतैर्धूपो मक्षिकाणां मशकानां विनाशनः" ॥
इति गारुड़े १८१ अध्यायः ॥ * ॥
हरिरुवाच ।
"ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुर्नागकेशरम् ।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम् ॥
ॐ नारायणायेति स्वाहा ।
ताम्बूलं यस्य दीयेत स वशी स्यात् समन्ततः ।
ॐ हरि हरि स्वाहा ।
गोदन्तहरितालञ्च संयुक्तं काकजिङ्घया ।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत् ॥
श्वेतसर्षपनिर्म्माल्यं यद्गृहे तद्विनाशकृत् ।
वैभीतकं शाखोटकं मूलं पत्रञ्च संयुतम् ॥
स्थाप्यते यद्गृहद्वारे तत्र वै कलहो भवेत् ॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत् ।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात् ॥
अगुरु गुग्गुलुश्चैव नीलोत्पलसमन्वितम् ।
गुड़ेन धूपयित्वा तु राजद्वारे प्रियो भवेत् ॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम् ।
यं पश्येत्तिलकेनैव वशी कुर्य्यान्नृपालये ॥
काकजिङ्घा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम् ।
आत्मरक्तं सभावेयं वशी भवति मानवः ॥
आरण्यस्य विड़ालस्य गृहीत्वा रुधिरं शुभम् ।
करञ्जतैले तद्भाव्य रुद्राग्नेः कज्ज्वलं ततः ॥
पातयेत् पद्मसूत्रेण अदृश्यः स्यात् तदञ्जनात् ॥
ॐ नमः खड्गवज्रपाणये महायक्षसेनापतये
स्वाहा । ॐ वक्र क्रीँ क्रीँ वरसंयुक्ता त्वरिता
विद्या ॐ मातश्चौरं स्तम्भय स्वाहा ।
सहस्रं परिजप्या तु विद्येयं चौरवारिणी ।
महासुगन्धिकामूलं शुक्रं स्तम्भेत् कटौ स्थितम् ॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः सिद्धिं कुरु कुरु
स्वाहा ।
सप्ताभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च क्षणाद्वै सा वशा भवेत् ॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत् ।
अङ्गलेपाच्च वनिता नान्यं भर्त्तारमिच्छति ॥
मुस्तदण्डीशिफा वक्त्रे क्षिप्ता शुक्रस्य स्तम्भनम् ।
मूलं जयन्त्या वक्त्रस्थं व्यवहारे जयप्रदम् ।
अपराजिताशिफां दद्यान्नीलोत्पलसमन्विताम् ।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम् ॥
रोचनानागपुष्पाणि विल्वपुष्पं प्रियङ्गवः ।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशेत् ॥
ॐ क्लॉं गौरि देवि सौभाग्यं पुत्त्रवश्यादि देहि मे ।